संस्कृत वार्ताः

09/02/2025

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

- प्रधानमन्त्री श्रीनरेन्द्रमोदी द्विदिवसीय-ए-आई-शिखर-सम्मेलनस्य सहाध्यक्षतार्थं श्व: पेरिसनगरं प्रस्थास्यति।
- देहल्याः मुख्यमन्त्री आतिशीवर्या विधानसभा-निर्वाचने आम-आदमी-पार्टीति-दलस्य पराजयानन्तरम् उपराज्यपालस्य विनयकुमारसक्सेना-वर्यस्य समक्षे स्वीयं त्यागपत्रम् समर्पितवती।
- छत्तीसगढे बीजापुर-जनपदे सुरक्षाबलै: साकं सञ्जाते संघर्षे एकत्रिंशत् माओवादिन: मारिता:।
- अमेरिकादेशेन हमासदेशं प्रति इजराइली बन्धकानां विमुक्तीकरण-निर्देश: प्रसारित:।
- कटकबारबती-खेल-प्रांगणे संजाते त्रि-एकदिवसीय-क्रिकेट-शृंखला- प्रतिस्पर्धायाम् इंग्लैण्ड-देशेन भारतस्य समक्षे पञ्च-त्रिशत् धावनाङ्कानां लक्ष्यं स्थापितम्।

<u>पेरिस- ए- आई-एक्शन-समिट – 2025</u>

श्वारभ्य पेरिसमध्ये द्विदिवसीयस्य ए-आई-एक्शन-समिट इत्यस्य शिखरसम्मेलनस्य आरम्भो भविष्यति, यत्र च कृत्रिमता-तन्त्र-विकास-विषये वैश्विकनेतारः उद्योगपतयः शोधकर्तारश्च समवेताः भविष्यन्ति, प्रधानमन्त्री नरेन्द्रमोदी फ्रांसस्य च राष्ट्रपतिना इमैनुएल-मैक्रों इत्यनेन शिखरसम्मेलनस्य सहाध्यक्षतां विधातुं श्वः परिसं प्रति प्रस्थास्यति। एतस्य कार्यक्रमस्य उद्देश्यं वैश्विक-एआई-नीतीनां साकारीकरणं नवाचारस्य च नैतिकदायित्वेन सह सर्जनं विद्यते।

<u>देहल्याः मुख्यमन्त्री आतिशी-त्यागपत्रम्</u>

देहल्याः मुख्यमन्त्री आतिशीवर्या विधानसभा-निर्वाचने आम-आदमी-पार्टीति-दलस्य घोर-पराजयानन्तरम् अद्य प्रातः देहल्याः राजनिवासे उपराज्यपालस्य विनयकुमारसक्सेना-वर्यस्य समक्षे से स्वीयं त्यागपत्रम् समर्पितवती। आतिशीवर्या स्वीय-कालकाजी-आसनं विजेतुं सफला

सञ्जाता। अवधेयं यत् भ्रष्टाचार-दूषण-प्रकरणे केजरीवालेन यदा मुख्यमन्त्रिपदं त्यक्तमासीत् ततः परम् आतिशीवर्या मुख्यमन्त्रिपदम् अलङ्कृतवती आसीत्। एतस्मिन् अन्तरे देहल्याः उपराज्यपालः विनयकुमारसक्सेनावर्यः देहल्याः सप्तम-विधान-सभां फरवरीमासस्य अष्टदिनाङ्कपर्यन्तं निरस्तीकृतवान्।

अवधेयास्पदं यत् भारतीय-जनता-पार्टीति दलेन देहली-विधानसभा-निर्वाचने षडविंशतिवर्षानन्तरं सप्तत्यासनेषु अष्टचत्वारिंशत् आसनानि विजित्य विजयश्री प्राप्ता। सूत्रैः प्राप्तसूचनानुसारं श्रीमोदिनः विदेशयात्रानन्तरम् अग्रिमसप्ताहे भाजपादलं सर्वकारघटनं कर्तुं शक्नोति। संचारतन्त्रैः सह संवाद-प्रसङ्गे भाजपेतिदलस्य प्रदेशाध्यक्षः वीरेन्द्रसचदेवाः अवदत् यत् भाजपेतिदलेन जनहितार्थं गृहीताः सर्वसङ्कल्पाः पूरयिष्यन्ते देहली च विकसित-राजधानीत्वेन विकासयिष्यते।

<u>प्रधानमन्त्री श्रीनरेन्द्रमोदी देहली निर्वाचनम् -</u>

प्रधानमन्त्री श्रीनरेन्द्रमोदी देहली-विधानसभा-निर्वाचने दलीय-विजयानन्तरम् अकथयत् यत् नैर्वाचनिक-परिणामेन स्पष्टतया अवगम्यते यत् देशवासिनः विश्वसन्ति यत् भारतीय-जनता-पार्टीति दलस्य शासनं केन्द्रेण सह राज्येऽपि भवेदिति। देहली-जनतया इदं स्पष्टीकृतं यत् देहल्याः यथार्थ-स्वामिनः देहलीवासिनः एव सन्ति। देहली किञ्चन नगरमात्रमेव नास्ति अपित्वत्र कश्चन लघुभारतं निवसति, यच्च 'एकं भारतं श्रेष्ठभारतम्' इत्यस्याः धारणायाः अनुरूपं विद्यते। श्रीमोदिना तथ्येऽस्मिन्नपि संतोषोऽभिव्यक्तः यत् देहल्यां समाजस्य प्रत्येकं वर्गेण व्यापक-संख्यया भाजपेति-दलस्य पक्षे स्वीयं मतदानं कृतम्।

अत्र च महिला-मतदात्र्यः भाजपेतिदलस्य समग्र-संरक्षणं कृतवत्यः, अतः नारीशक्ति-समक्षे अस्माभिरत्र स्वीकृतस्य प्रत्येकमपि सङ्कल्पस्य पूर्तिर्नूनं करिष्यते। भाषमाणः श्रीमोदी प्रत्यपादयत् यत् एन-डी-ए- इत्यस्य पर्यायत्वेन सुशासनं विकासश्च वर्तेते। अनेन सहैव प्रधानमन्त्रिणा प्रोक्तं यत् भ्रष्टाचारं विरुध्य उद्घोष-कर्तृ-आपदलं स्वयमेव भृशं भष्टाचरणम् अकरोत्। भाजपा-दलीयोऽध्यक्षः श्रीजयप्रकाश-नड्डावर्यः कथितवान् यत् प्रधानमन्त्री श्रीनरेन्द्रमोदी देहली-वास्तव्यानां जनानां हृदयेषु विराजते, तस्मादेव भष्ट्राचरणे लीनं आपेति-दलं जनाः अत्र सर्वथा निरस्तीकृतवन्तः।

छत्तीसगढ-सङ्घर्षः

छत्तीसगढे सुरक्षाबलैस्सह सञ्जाते सङ्घर्षे एकत्रिंशत् माओवादिनः सैन्यबलैः मारिताः। भुशुण्डी-गोलकादि-प्रहारेषु द्वौ सुरक्षाकर्मिणौ वीरगतिं प्राप्तौ, अन्यौ द्वौ च व्रणितावपि सञ्जातौ इति सूचना वर्तते। गृह मन्त्री अमितशाह: वीरसैन्य पारिवारिकजनान प्रति संवेदना: प्रकटिता। तैन भणितं यत् सुरक्षाबलै: बीजापुर-छत्तीसगढे च स्वलक्ष्यं प्राप्तम्। माओवादीनां मृत्यौ: स्थलात् बृहन्मात्रिक आयघ-सामग्री अपि अधिगतास्ति।

प्रधानमन्त्री -सी-ए-जी-रिपोर्ट –

प्रधानमन्त्री श्रीनरेन्द्रमोदी देहलीजनान् आश्वासितवान् यत् देहल्यां आपसर्वकारस्य विषये नियन्त्रक-महालेखा-परीक्षक-समाख्या प्रथम-विधानसभा-सत्रे प्रकाशयिष्यते अवधेयं यत् सीएजी-इति-समाख्यायां दिल्लीसर्वकारस्य कराधान-नीतौ अनियमितता-कारणात् षडविंशत्यधिक-द्विसहस्र-कोटि-रूप्यकाणां महत्त्वपूर्ण-राजस्वस्य क्षतिः कृता वर्तते,।

समाख्याविषयकं स्पष्टीकरणं विधानसभासत्रे प्रदास्यते, आपसर्वकारेण कराधान-निर्धारणे पारदर्शिता न परिपालिता, अपि च नियमानाम् उल्लङ्घनमपि कृतम्।

काशी-तमिल-सङ्गमम् –

काशी-तमिल-सङ्गमम् इत्यस्य सम्मेलनस्य तृतीयस्य संस्करणस्य आरम्भः अस्य मासस्य पञ्चदशदिनाङ्कात् भविष्यति। ऐषमः वर्षस्य विषयः – ऋषि-अगस्तियारः इति भविष्यति। प्रतिभागिनः एतस्य कार्यक्रमस्य माध्यमेन महाकुम्भस्य आयोध्या-स्थित-राममन्दिरस्य चापि दर्शनानुभवं प्राप्स्यन्ति। अद्य चैन्नयि-मध्ये नैके विद्यालयीयाः छात्रा अगस्तियार-वर्यस्य वेशभूषां धृत्वा भ्रमणं कृतवन्तः।

विश्वपुस्तक-मेलापक-

नवदेहलीस्थे भारत-मण्डपे जायमानस्य विश्वपुस्तक-मेलापकस्य दिपञ्चाशत्-तम-संस्करणस्य अद्य समाप्तिर्भविष्यति। एतस्य मेलापकस्य आयोजनं राष्ट्रिय-पुस्तक-न्यास-भारत-वाणिज्य-संवर्धन-सङ्घटनाभ्यां कृतम् अत्र प्रायः द्विसहस्रप्रकाशकाः सहस्रं वक्तारश्च समागताः।

प्रधानमन्त्री-परीक्षा-पे चर्चा –

प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना आरब्धस्य संवादात्मक-कार्यक्रमस्य परीक्षा-पे-चर्चा इत्यस्य अष्टमं संस्करणं श्वः ह्यः नवदेहल्याः भारतमण्डपे आयोजिष्यते। सर्वेभ्यः प्रदेशेभ्यः चिताः षडत्रिंशत् छात्राः प्रधानमन्त्रिणा सह साक्षात्संवादमपि करिष्यन्ति। अस्मिन् कार्यक्रमे सप्तानि ज्ञानवर्धनसत्राणि भविष्यन्ति।

अमेरिका-हमासः

अमेरिकादेशस्य मन्त्रिणा मार्को-रूवियो-वर्येण हमास-देशं प्रति निर्देशः प्रकाशितः यत् तत्रत्य-इस्रायलि-बन्धकान् तत्कालप्रभावेण विमुक्तान् कुर्यात्। हमासपक्षतः नवत्यधिक-चतुश्शत-दिवसेभ्यः त्रयामेरिकाजनाः बन्धकत्वेन अधिकृताः,, ततः परमेव अमेरिकायाः एतादृशं वक्तव्यं श्रुतिपथम् आगतम्।

रेलवे-वैष्णवः -

सूचना-प्रसारण-रेलवे-मन्त्रिणा अश्विनी-वैष्णवेनाद्य गोरखपुर-रेल-गोरखपुर-रेल-स्थानकं निरीक्षितम्। तत्रासौ गोरखपुर-रेल-स्थानकस्य प्रस्तावित-प्रारूपस्य अवलोकनमपि विहितम्। रेलाधिकारिभिः वैष्णवाय एतस्मिन् सन्दर्भे विस्तृत-सूचना प्रदत्ता। रेलस्थानक-प्रारूपमिदिं गोरक्षपुरस्य संस्कृतिं रिक्थं च मनसि निधाय विनिर्मितम्। वैष्णवेन प्रतिपादितं यत् तत्र विमानपत्तनं निषका नूतन-रेल-स्थानक-निर्माण-योजनायाः प्रस्तावः अभिसंस्तुतः।

## महाकुम्भ:

प्रयागराजे प्रचल्यमाणे महाकुम्भ-मेलापके जल-जीवन-मिशन इत्यख्या काचित् दर्शकदीर्घा स्थापिता। अत्र ग्रामीण-जीवनोपरि जातप्रभावः प्रदर्शितः। अस्मदीयेन वार्ताहरेण संसूचितं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे ग्रामीण-क्षेत्रेषु समायातः भद्रप्रभावः अपि अत्र द्रष्टुं शक्यते, महाकुम्भस्थे त्रिवेणी-सङ्गमे राष्ट्रपतिः द्रौपदीमुर्मुः अपि श्वः पवित्रसलिलावगाहनं करिष्यति। अवसरेऽस्मिन् उत्तरप्रदेशीयः मुख्यमन्त्री योगी आदित्यनाथोपि उपस्थास्यति।

## जम्मूकाश्मीर-प्रतिबन्धः

जम्मू-काश्मीरे रियासी-जनपदीय-प्रशासनेन माता-वैष्णो-देव्याः देवालये गन्तूकानां श्रद्धालूनां कृते आधार-शिविर-कटरायां मदिरा-मांस-युक्त-भोजने प्रतिबन्धः द्विमासात्मककालपर्यन्तः वर्धितः। एवंविधः अयं प्रतिबन्धः पवित्रगुहायाः द्वादश-किलोमीचर-परिमित-परिसरे प्रभाविभूतो विद्यते।

## क्रिकेट्

भारत-इङ्ग्लैण्ड-देशयोर्मध्ये एकदिवसीय-क्रिकेट श्रृंखला क्रीडा-प्रतिस्पर्धायाः द्वितीय-द्वन्द्वमद्य ओडिशायाः कटक-खेल-क्रीडाङ्गणे प्रतिस्पर्ध्यते। अंतिमां सूचनां यावत् इंग्लैण्ड देशेन भारतदेश-प्रम्मुखं विजयार्थं पञ्च-त्रिशत-धावनाकानं लक्ष्यं स्थापितू।

।। इति वार्ता:।।